Roll No. ..........................  Total No. of Pages : 6

Total No. of Questions : 9

# उत्तरमध्यमा द्वितीयखण्ड वार्षिक परीक्षा 2022-23

**विषय कोड : 1203**

## नव्यव्याकरणम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

**निर्देश :— सर्वे** प्रश्नाः समाधेयाः।

1. यथोचितं विकल्पं लिखत — 7×1=7

(1) कति टित् लकाराः भवन्ति ?

(क) पञ्च (ख) अष्ट

(ग) दश (घ) एकादश

(2) वेदे कस्य लकारस्य प्रयोगो भवति ?

(क) लट् (ख) लिट्

(ग) लुट् (घ) लेट्

(3) सकर्मकेभ्य धातुभ्यः लकाराः कस्मिन्नर्थे भवन्ति ?

(क) कर्मणि (ख) कर्त्तरि

(ग) कर्मणि कर्त्तरि च (घ) भावे कर्त्तरि च

(4) संयोगे परे ह्रस्वं भवति—

(क) लघुसंज्ञकम् (ख) गुरुसंज्ञकम्

(ग) दीर्घसंज्ञकम् (घ) किमपि न

(5) दिवादिभ्यः धातुभ्यः विकरणो भवति–

(क) शप् (ख) श्यन्

(ग) श्नुः (घ) शः

(6) "देयम्" इत्यत्र प्रत्ययः अस्ति–

(क) ण्यत् (ख) यत्

(ग) क्यप् (घ) कोऽपि न

(7) "बुधः" इत्यत्र प्रत्ययः अस्ति–

(क) ण्वुल् (ख) तृच्

(ग) कः (घ) टः

2. यथायोग्यं योजयत : 7×1=7

| | | | |
|---|---|---|---|
| (क) | पठितव्यम् | (*i*) | यत् |
| (ख) | शिष्यः | (*ii*) | कः |
| (ग) | गृहम् | (*iii*) | तव्यत् |
| (घ) | भिन्नः | (*iv*) | शतृः |
| (ङ) | गच्छन् | (*v*) | क्तः |
| (च) | विद्वान् | (*vi*) | इत्रः |
| (छ) | चरित्रम् | (*vii*) | वसुः |

3. सत्य कथनानां समक्षे 'आम्' असत्य कथनानां समक्षे 'न' इति लिखत – 7×1=7

(क) "भवताम्" मध्यमपुरुषस्य रूपमस्ति।

(ख) कर्तुः प्रयोजकस्य हेतुसंज्ञः भवति।

(ग) रुधादिभ्यः श्ना भवति।

(घ) व्याङ्पूर्वः प्रायेण पृङ् धातुः प्रयुज्यते।

(ङ) कण्ड्वादिभ्यो यक् भवति।

(च) क्तक्तवतू निष्ठासंज्ञौ स्तः।

(छ) अद्यतनेऽर्थे लुट्लकारस्य प्रयोगो भवति।

4. रिक्तस्थानानि पूरयत् – 6×1=6

(क) श्रिञ् ..................................। (निंदायाम्, सेवायाम्)

(ख) जघास् ..................................। (अद्, हस्)

(ग) घुसंज्ञा ..................................। (दा, दाप्)

(घ) क्रयादिभ्यः ..................................। (श्नाम्, श्ना)

(ङ) स्वतन्त्रः ..................................। (कर्त्ता, क्रिया)

(च) सुपआत्मनः ..................................। (क्यच्, क्यङ्)

5. एकपदेन उत्तरम् लिखत – 7×1=7

(क) कति लकाराः भवन्ति ?

(ख) तुदति इत्यत्र कः धातुः ?

(ग) वैयाकरणसिद्धान्त कौमुद्याः रचयिता कः ?

(घ) एधनीयम् इत्यत्रं कः प्रत्ययः ?

(ङ) कति लादेशाः सन्ति ?

(च) कुरुचरः इत्यत्र कः प्रत्ययः ?

(छ) कस्मिन् उपपदे सति यजूंधातोः णिनिः भवति ?

6. अतिलघूत्तरीयाः प्रश्नाः – 10×2=20

(क) अभ्याससंज्ञा केन सूत्रेण भवति ?

(ख) एधेरन् कस्य पुरुषस्य रूपमस्ति ?

(ग) शिति परे जन्धातोः कः आदेशो भवति ?

(घ) सम्परिपूर्वकस्य कृधातो सुडागमः कस्मिन्नर्थे भवति ?

(ङ) "हेतुमति च" सूत्रं किं करोति ?

(च) काम्यच् प्रत्ययः केन सूत्रेण भवति ?

(छ) भावकर्मणोः इत्यत्र भावशब्दस्य किं तात्पर्यम् ?

(ज) हेतुहेतुमद्भावे कः लकारः भवति ?

(झ) नियोगकरणस्य उदाहरणं लिखत।

(ञ) जनार्दनः इत्यत्र कः प्रत्ययः ?

7. लघूत्तरीयाः प्रश्नाः – 6×3=18

(क) परोक्षे लिट् इति सूत्रस्य व्याख्यां कुरुत।

**अथवा**

भूधातोः लिट् लकारस्य रूपाणि लिखत।

(ख) अशात् इत्यत्र कः धातुः कश्च लकारः लिखत ?

**अथवा**

दिवु धातो! कति अर्थाः, तान् लिखत ?

(ग) सत्यापपाश ......... सूत्रं प्रपूर्य अर्थं लिखत।

**अथवा**

"चोरयते" इति प्रयोगसिद्धिं कुरुत।

(घ) पुत्रीयति प्रयोगसिद्धिं ससूत्रं कुरुत।

**अथवा**

करोत्यर्थे क्यङ् केन सूत्रेण भवति सूत्रं लिखत ?

(ङ) कति कृत्यप्रत्ययाः, तेषां नामानि लिखत।

**अथवा**

"बहुलम्" इति कतिविधं लिखत।

(च) कुम्भकारः इत्यस्य प्रयोगसिद्धिं कुरुत।

**अथवा**

भिक्षाकः इत्यत्र षाकन् प्रत्ययः केन सूत्रेण भवति सार्थं लिखत।

8. दीर्घोत्तरीयाः प्रश्नाः – 5×4=20

(क) अभवत्, एधन्ते शृण्वन्ति, गमिष्यति, अस्ति एतेषु त्रीणि रूपाणि ससूत्रं साधयत।

**अथवा**

सनाद्यन्ता धातवः इति सूत्रस्य व्याख्यां कुरुत।

(ख) दीव्यति सुनोति, तुदति, ननर्त, श्यति, दिदेषु एतेषु **त्रीणि** रूपाणि साधयत।

**अथवा**

भ्रस्ज धातोः लिट्लकारस्य रूपाणि लिखत।

(ग) छिदिर्, क्षुदिर्, ओविजी डुकृञ् प्रीञ् धातूनाम् अर्थं लिखत।

**अथवा**

पूञ्लूञ्स्तृञां चतुर्विंशतेः धातूनां क्रमात् (यथासंख्यम) लिखत।

(घ) धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रस्य व्याख्यां कुरुत।

**अथवा**

बोभोतु इति प्रयोगं ससूत्रं साधयत।

(ङ) धातोः सूत्रस्य व्याख्यां कुरुत।

**अथवा**

जनमेजयः, प्रियंवदः, वशंवदः विश्वम्भरः एतेषु **त्रीणि** (कानिचित्) रूपाणि साधनीयानि।

9. विश्लेषणात्मकाः प्रश्नाः – 2×4=8

(क) भट्टोजिदीक्षितस्य संक्षिप्तः परिचयो देयः।

वैः सिद्धान्तकौमुद्याः कतिभागाः, द्वितीयभागे केषां निरूपणम् अस्ति ?

(ख) संहिता कुत्र नित्या कुत्रविवक्षाधीना, कारिकासहितं लिखत्।